# Rishigautamaproktam Shivarchane Ghritakambalamahimavarnanam

# ઋષિગૌતમપ્રોક્તં શિવાર્ચને ઘૃતકમ્બલમહિમવર્ણનમ્

## Document Information

Text title : Rishigautamaproktam Shivarchane Ghritakambalamahimavarnanam

File name : shivArchaneghRRitakambalamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 192-198||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Rishigautamaproktam Shivarchane Ghritakambalamahimavarnanam

# ઋષિગૌતમપ્રોક્તં શિવાર્ચને ઘૃતકમ્બલમહિમવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

ગૌતમઃ (આહ)

શિવાર્ચનાત્પરો ધર્મો નાસ્તિ નાસ્તિ જગત્રયે ।
ઐશ્વર્યદં તથા મોક્ષપ્રદં શઙ્કરપૂજનમ્ ॥ ૧૯૨॥

મહેશપૂજનાદન્યન્નાસ્ત્યેવૈશ્વર્યમુક્તિદમ્ ।
સત્યમેતત્પુનઃ સત્યમિતિ વેદા વદન્તિ હિ ॥ ૧૯૩॥

યમર્થં હૃદિ સઙ્કલ્પ્ય યઃ પૂજયતિ શઙ્કરમ્ ।
સ તમર્થમવાપ્નોતિ સત્યં સત્યમિતિ શ્રુતિઃ ॥ ૧૯૪॥

શિવલિઙ્ગાર્ચનેનૈવ ભુક્ત્વા ભોગાનનેકધા ।
મુક્તિં ચ પ્રાપ્નુવન્ત્યેવ શિવાર્ચનપરાયણાઃ ॥ ૧૯૫॥

અખણ્ડમતુલં દ્રવ્યં યસ્ય યાવદપેક્ષિતમ્ ।
તતોઽપ્યધિકમૈશ્વર્યં પ્રાપ્તવ્યં શિવપૂજયા ॥ ૧૯૬॥

માઘે માસિ મહાદેવે યઃ કુર્યાદ્ઘૃતકમ્બલમ્ ।
સ ભુક્ત્વા સકલાન્ભોગાનન્તે મોક્ષં ચ વિન્દતિ ॥ ૧૯૭॥

નરા ભૂપતયો જાતા ઘૃતકમ્બલદાનતઃ ।
જાતિસ્મરાશ્ચ તે જાતા મુક્તાશ્ચાન્તે શિવાર્ચનાત્ ॥ ૧૯૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં શિવાર્ચને ઘૃતકમ્બલમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૧૯૨-૧૯૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 192-198..

Notes:

Ṛṣi Gautama ઋષિ ગૌતમ iterates about offering of the Ghṛtakambalam ઘૃતકમ્બલમ્ during Māgha māsa માઘ માસ for worship of Śiva શિવ.
Ghṛtakambalam ઘૃતકમ્બલમ્ procedure finds detailed mention in the Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ and in the Kāmika Āgama કામિક આગમ.
The Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ has several other details about Śivapūjāsādhanāni શિવપૂજાસાધનાનિ.

Proofread by Ruma Dewan

---

*Rishigautamaproktam Shivarchane Ghritakambalamahimavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*